"ध्मायमानस्य लोहस्य मलं मण्डूरमुच्यते ।
लोहसिंहानिका किट्टी सिंहाणश्च निगद्यते ॥
यल्लोहं यद्गुणं प्रोक्तं तत्किट्टमपि तद्गुणम् ॥"
इति भावप्रकाशः ॥

( तथास्योद्धरणादिविधिः ।
"शतोर्द्धमुत्तमं किट्टं मध्यञ्चाशीतिवार्षिकम् ।
अधमं षष्टिवर्षीयं ततो हीनं विषोपमम् ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाद्यधिकारे ॥
"कुरवं पथ्याचूर्णं द्विपलगन्धाश्मलोहकिट्टञ्च ।
शुद्धरसस्यार्द्धपलं भृङ्गस्य रसं केशराजस्य ॥"
इति वैद्यकचक्रपाणिसंग्रहे परिणामशूलाधिकारे ॥ )

लोहचूर्णं, क्ली, ( लोहस्य चूर्णम् ।) लोहकिट्टम् । इति राजनिर्घण्टः ॥ (यथा, बृहत्संहितायाम् । ७६ । ३ ।
"माक्षीकधातुमधुपारदलोहचूर्ण-
पथ्याशिलाजतुविडङ्गघृतानि योऽद्यात् ।
सैकानि विंशतिरहानि जरान्वितोऽपि
सोऽशीतिकोऽपि रमयत्यबलां युवेव ॥")

लोहजं, क्ली, (लोहात् जायते इति । जन् + डः ।) लोहकिट्टम् । इति राजनिर्घण्टः ॥ ( पर्य्यायोऽस्य यथा, "मण्डूरं लोहजं किट्टम् ।" इति वैद्यकरत्नमालायाम् ॥ ) कांस्यम् । इति हेमचन्द्रः ॥

लोहद्रावी [ न् ] पुं, (लोहानि द्रावयतीति । द्रु + णिच् + णिनिः ।) टङ्कणः । इति राजनिर्घण्टः ॥ ( टङ्कणशब्देऽस्य विषयो विज्ञेयः ॥ )

लोहनालः, पुं, ( लोहस्य नालं दण्डो यस्य । ) नाराचः । इति त्रिकाण्डशेषः ॥

लोहपृष्ठः, पुं, ( लोहस्येव कठिनं श्यामलं वा पृष्ठं यस्य । ) कङ्कपक्षी । इत्यमरः ॥ लौहमयपृष्ठयुक्ते, त्रि ॥

लोहप्रतिमा, स्त्री, ( लोहस्य प्रतिमा । ) लौहमयी प्रतिमा । तत्पर्य्यायः । सूर्म्मी २ स्थूणा ३ । इत्यमरः ॥ शूर्म्मी ४ शूर्म्मिः ५ शूर्म्मः ६ । इति भरतः । शूर्म्मिका ७ । इति शब्दरत्नावली ॥

लोहमयं, त्रि, लोहात्मकम् । लोहनिर्म्मितम् । लोहशब्दात् तद्रूपार्थे मयट्प्रत्ययेन निष्पन्नम् ॥ ( यथा, छान्दोग्योपनिषदि । ६ । १ । ५ ।
"यथा सौम्यैकेन लोहमणिना सर्व्वं लोहमयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं लोहमित्येव सत्यम् ।")

लोहमारकः, पुं, ( लोहं मारयति चूर्णयतीति । मृ + णिच् + ण्वुल् । ) शालिञ्चशाकः । इति त्रिकाण्डशेषराजनिर्घण्टौ ॥

लोहलः, पुं, ( लोहं लातीति । ला + कः । ) शृङ्खलाचाप्यः । इति मेदिनी । ले, १२६ ॥

लोहलः, त्रि, ( लोहमिव लातीति । ला + कः । ) अव्यक्तवाक् । इत्यमरः ॥ लोहग्राहकश्च ॥

लोहवरं, क्ली, ( लोहेषु सर्व्वतैजसेषु वरम् । ) स्वर्णम् । इति त्रिकाण्डशेषः ॥

लोहश्लेषणः, पुं, ( लोहानि सर्व्वतैजसानि श्लेषयति योजयतीति । श्लेषि + ल्युः । ) टङ्कणः । इति हेमचन्द्रः ॥

लोहसङ्करं, क्ली, ( लोहानां सङ्करो यत्र । ) वर्त्तलोहम् । इति राजनिर्घण्टः ॥ मिश्रिततैजसञ्च ॥

लोहाख्यं, क्ली, (लोहमेव आख्या यस्य ।) अगुरु । इति रत्नमाला ॥

लोहाभिसारः, पुं, ( लोहानां शस्त्रादीनां अभिसारो यत्र ।) लोहाभिहारः । इत्यमरटीकायां भरतः ॥

लोहाभिहारः, पुं, ( लोहानामभिहारो यत्र । ) शस्त्रभृतां राज्ञां नीराजनाविधिः । इत्यमरः ॥ महानवमीदीपायां अश्वादीनां नीराजने सति पश्चात् शस्त्रधारिणां राज्ञां यः शास्त्रोक्तो निर्म्मञ्छनप्रधानो विधिः प्रस्थानात् प्राक् स लोहाभिहारः । लोहस्य शस्त्रस्य अभिहारः सर्व्वतो हरणमत्रेति बहुव्रीहिः । लोहाभिहार इत्युक्तो विधिर्नीराजनोत्तर इत्यमरमाला ॥ लोहोऽस्त्री शस्त्रके लौहे इति मेदिनी ॥ लोहाभिसार इति पठन्त्यन्ये तत्र लोहं शस्त्रं अभिसार्य्यते प्रस्थाप्यतेऽत्रेति घञ् वाहनायुधादेर्निःशेषेण राजनं यत्र सा नीराजना नीरस्य शान्त्युदकस्य अजनं क्षेपो यत्र सा नीराजना वा । इति भरतः ॥

लोहार्गलं, क्ली, ( लोहस्य अर्गलमिव । ) तीर्थविशेषः । यथा,—

वराह उवाच ।
"शृणु देवि च तत्त्वेन यन्मां त्वं परिपृच्छसि ।
गुह्यमन्यच्च वक्ष्यामि महतः कर्म्मणो गतिः ॥
ततः सिद्धवटे गत्वा त्रिंशद्योजनदूरतः ।
म्लेच्छमध्ये वरारोहे हिमवन्तं समाश्रितम् ॥
तत्र लोहार्गलं नाम निवासो मे विधीयते ।
गुह्याः पञ्चदश यत्र समन्तात् पञ्चयोजनम् ।
सुलभं पुण्ययुक्तानां मम कर्म्मानुचारिणाम् ।
तत्र तिष्ठाम्यहं भद्रे ! उदीचीं दिशमाश्रितः ॥
तत्र ब्रह्मा च रुद्रश्च स्कन्देन्द्रश्च मरुद्गणाः ।
आदित्या वसवो रुद्रा अश्विनौ च महौजसः ॥
सोमो बृहस्पतिश्चैव ये चान्ये च दिवौकसः ।
तेषाञ्चैवार्गलं दत्त्वा चक्रं गृह्य महौजसम् ॥
ततो मे दानवाः सर्व्वे क्रमन्तो लोकमुत्तमम् ।
मया चैवान्तरं ज्ञात्वा हत्वा मायाञ्च वैष्णवीम् ॥
शतकोटिसहस्राणि शीघ्रमेव निपातितम् ।
एवं लोहार्गलेत्यासीन्नाम मे तत्र कारितम् ॥
एकधारा पतत्यत्र इन्द्रगोपकसन्निभा ।
यस्तत्र कुरुते स्नानं सप्तरात्रोषितो नरः ॥
ब्रह्मलोकं समासाद्य ब्रह्मणा सह मोदते ।
अथात्र मुञ्चते प्राणानहङ्कारविवर्ज्जितः ॥
ब्रह्मलोकं परित्यज्य मम लोकं प्रपद्यते ।
गुह्याख्याने महाभागे देवि लोहार्गले मम ॥
सिद्धिकामेन मर्त्त्येन गन्तव्यं नात्र संशयः ॥
एतत्ते कथितं भद्रे लोहार्गलनिवासिनः ।
माहात्म्यं पद्मपत्राक्षि गुह्यं परममहौजसम् ।
मङ्गल्यञ्च पवित्रञ्च मम भक्तसुखावहम् ॥"
इत्यादि वराहपुराणे लोहार्गलमाहात्म्यवर्णनं नामाध्यायः ॥ * ॥ लौहकीलके क्ली स्त्री च ॥

लोहि, क्ली, श्वेतटङ्कणम् । इति कश्चिद्राजनिर्घण्टः ॥

लोहिका, स्त्री, ( लोहमस्त्यत्रेति । लोह + ठन् ।) लौहपात्रम् । तत्पर्य्यायः । खरसोन्दः २ खरपात्रम् ३ । इति त्रिकाण्डशेषः ॥

लोहितं, क्ली, ( रुह्यते इति । रुह + "रुहेरश्च लो वा ।" उणा० ३ । ९४ । इति इतन् रस्य लत्वञ्च । ) रक्तगोशीर्षम् । कुङ्कुमम् । रक्तचन्दनम् । इति मेदिनी । ते, १४७ ॥ पत्तङ्गम् । हरिचन्दनम् । हयकुङ्कुमम् । रुधिरम् । इति राजनिर्घण्टः ॥ ( यथा, मनुः । ४ । ५६ ।
"नाप्सु मूत्रं पुरीषं वा ष्ठीवनं वा समुत्सृजेत् ।
अमेध्यलिप्तमन्यद्वा लोहितं वा विषाणि वा ॥")
युद्धम् । इति हेमचन्द्रः ॥ ( सरोवरविशेषः । इति मात्स्ये । १२० । १२ ॥ माणिक्यम् । तत्पर्य्यायो यथा,—
"माणिक्यं पद्मरागः स्याच्छोणरत्नञ्च लोहितम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

लोहितः, पुं, ( रुह + इतन् । रस्य लः । ) नदविशेषः । ( सागरविशेषश्च । यथा, रामायणे । ४ । ४० । ३९ ।
"ततो रक्तजलं भीमं लोहितं नाम सागरम् ।
गत्वा प्रेक्षत तां चैव बृहतीं कूटशाल्मलीम् ॥" )
भौमः । ( यथा, बृहत्संहितायाम् । ६ । ८ ।
"मध्येन यदि मघानां गतागतं लोहितः करोति ततः ।
पाण्ड्यो नृपो विनश्यति शस्त्रोद्योगाद्भयमवृष्टिः ॥" )
रक्तवर्णः । इति मेदिनी । ते, १४८ ॥ रोहितमत्स्यः । मृगविशेषः । इति शब्दरत्नावली ॥ सर्पः । ( यथा, महाभारते । २ । ९ । ८ ।
"वासुकिस्तक्षकश्चैव नागश्चैरावतस्तथा ।
कृष्णश्च लोहितश्चैव पद्मश्चित्रश्च वीर्य्यवान् ॥")
सुरान्तरः । इति धरणिः ॥ मङ्गलः । इति शब्दचन्द्रिका ॥ रक्तांशुः । रक्तशालिः । इति राजनिर्घण्टः ॥ ( यथा, सुश्रुते । १ । ४६ ।
"षष्टिका यवगोधूमा लोहिता ये च शालयः ।
मुद्गाढकी मसूराश्च धान्येषु प्रवराः स्मृताः ॥")
बलभेदः । इति हेमचन्द्रः ॥ ( पर्व्वतविशेषः । इति मात्स्ये । १२० । ११ ॥ कुशद्वीपस्थवर्षविशेषः । इति तत्रैव । १२२ । ६५ ॥ )

लोहितः, त्रि, रक्तवर्णयुक्तः । इत्यमरः ॥ ( यथा, मनुः । ५ । ६ ।
"लोहितान् वृक्षनिर्य्यासान् व्रश्चनप्रभवांस्तथा ।
शेलुं गव्यञ्च पेयूषं प्रयत्नेन विवर्ज्जयेत् ॥" )